# मूलरामायणम्



सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ।
आर्यस्सर्वसमश्चैव सदैवप्रियदर्शनः ।। 1.1.16 ।।

पदच्छेदः – सर्वदा अभिगतः सद्भिः समुद्रः इव सिन्धुभिः आर्यः सर्वसमः च एव सदा एव प्रियदर्शनः

पदपरिचयः –
सर्वदा = सर्वस्मिन् काले
अभिगतः = सङ्गतः
सद्भिः = साधु-जनैः
समुद्रः इव = सागरः इव
सिन्धुभिः = नदीभिः
आर्यः = श्रेष्ठः
सर्वसमः = सर्वेषु समः / समदर्शी

पदपरिचयः –
सदा एव = सर्वदा
प्रियदर्शनः = प्रसन्नरूपः/आकर्षकः

## सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ।
## आर्यस्सर्वसमश्चैव सदैवप्रियदर्शनः ।। 1.1.16 ।।

सर्व + दा (तद्धितान्त-अव्ययम्) = सर्वदा

अभि+गम्+क्त = अभिगत

आर्यः = "ऋ"-गतौ +ण्यत् अनुकर्तुं योग्यः इत्यर्थः ।

महाकुल,कुलीन,आर्य,सभ्य,सज्जन,साधु – अमरः

सर्वेषु समः = सर्वसमः (स.तत्.)

प्रियं दर्शनं यस्य सः = प्रियदर्शनः (ब.व्री)

सम्+उन्दी (क्लेदने)=समुद्रः (चन्द्रोदय-काले उन्दन्ति तरङ्गाः इति)

मुद्रया सह वर्तते इति समुद्रः (रत्नादयः मुद्राः, मुद्रा = मर्यादा अपि)

स्यन्दु – प्रस्रवणे – सिन्धुः

पूर्णोपमा
उपमानम् = समुद्रः सिन्धुभिः सह
उपमेयम् = रामः, सज्जनैः सह
साधारणधर्मः = अभिगमनम्
उपमावाचकम् = इव

**अन्वयः**

समुद्रः सिन्धुभिः इव (सः रामः) सर्वदा सद्भिः अभिगतः (अस्ति) । आर्यः सर्वसमः एव च (तथा) सदा एव प्रियदर्शनः (सः अस्ति)

स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः ।
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव ।। 1.1.17 ।।

पदच्छेदः – सः च सर्व-गुणोपेतः कौसल्यानन्दवर्धनः समुद्रः इव गाम्भीर्ये धैर्येण हिमवान् इव

पदपरिचयः –

सः च = रामः च
सर्वगुणोपेतः = सकल-गुणैः युक्तः
कौसल्यानन्दवर्धनः = जनन्याः कौसल्यायाः हर्ष-जनकः
समुद्रः इव = सागरः इव
गाम्भीर्ये = गभीरतायाम्
धैर्येण = धीरतया
हिमवान् इव = हिमालयः इव

# स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः ।
# समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव ।। 1.1.17 ।।

सर्वे ते गुणाः = सर्वगुणाः

सर्वगुणैः उपेतः = सर्वगुणोपेतः (तृ.तत्)

वृध् – णिच् - वर्धयति – ल्युट् = वर्धनः

आनन्दस्य वर्धनः = आनन्दवर्धनः (ष.तत्)

कौसल्यायाः आनन्दवर्धनः = कौसल्यानन्दवर्धनः (ष.तत्)

गम्भीरस्य भावः(ष्यञ्) = गाम्भीर्यम् तस्मिन् =गाम्भीर्ये

धीरस्य भावः (ष्यञ्)= धैर्यम् तेन = धैर्येण

हिमम् अस्य अस्मिन् वा अस्ति इति (मतुप्) = हिमवान्

गम् + ईर = गभीर/गम्भीर - निम्न,गभीर,गम्भीर - अमरः

लुप्तोपमालङ्कारः
उपमानम् = समुद्रः
उपमेयम् = रामस्य हृदयम्,
साधारणधर्मः = गम्भीरता
उपमावाचकम् = इव

लुप्तोपमालङ्कारः
उपमानम् = हिमालयः
उपमेयम् = रामस्य चरित्रम्,
साधारणधर्मः = स्थिरता
उपमावाचकम् = इव

अन्वयः

सः च सर्वगुणोपेतः कौसल्यानन्दवर्धनः गाम्भीर्ये समुद्रः इव धैर्येण हिमान् इव (अस्ति)

# कृदन्ताः

## ल्युट्-प्रत्ययः

पठनम्
धावनम्
नयनम्
शयनम्
खादनम्
पानम्
दर्शनम्
दानम्

- "यु" स्थाने "अन्" आदेशः।
- (अनम्/अणम्-इति अन्ते श्रूयते।)
- सर्वेभ्यः धातुभ्यः परतः अस्य प्रयोगः शक्यः ।
- भावार्थे (क्रियां बोधयति)

श्रवणम्
करणम्
हरणम्
प्रेषणम्
ग्रहणम्

# कृदन्ताः
# ल्युट्-रूपाणि

“इ/ई"=अय्+अनम्,

चि=चयनम्,
स्मि=स्मयनम्
शी = शयनम्,
डी = डयनम्,
क्री = क्रयणम्
नी = नयनम्
श्रि = श्रयणम्
(अधि)इ=अध्ययनम्

उपान्त्यः ह्रस्व-इकारः = ए

लिख्=लेखनम्
क्षिप् = क्षेपणम्
छिद् = छेदनम्
मिल् = मेलनम्
लिप् = लेपनम्
सिच् = सेचनम्

उ/ऊ=अव्+अनम्

भू = भवनम्
स्तु = स्तवनम्
हु=हवनम्
प्लु=प्लवनम्

# कृदन्ताः

## ल्युट्-रूपाणि

उपान्त्यः ह्रस्व-उकारः = ओ
बुध् = बोधनम्
त्रुट् = त्रोटनम्
रुद् = रोदनम्
युज् = योजनम्
नुद् = नोदनम्
भुज् = भोजनम्
घुष् = घोषणम्

ऋ/ॠ = अर्
मृ = मरणम्
भृ = भरणम्
कृ = करणम्
धृ = धरणम्
तॄ = तरणम्
(उपान्त्यः चेदपि)
वृत् = वर्तनम्
नृत् = नर्तनम्
वृध् = वर्धनम्
वृष् = वर्षणम्
मृज् = मार्जनम्
कृत् = कर्तनम्
तृप् = तर्पणम्

ए/ऐ-अन्ताः = आ
गै = गानम्
ध्यै = ध्यानम्
ह्वे = ह्वानम्
त्रै = त्राणम्

# भावार्थकाः तद्धितान्ताः

त्व-प्रत्ययः – (नपुंसकम्)
तल्-प्रत्ययः – (स्त्री)
ष्यञ्-प्रत्ययः (य) – (नपुंसकम्)

मधुरस्य भावः
मधुरत्वम् मधुरता माधुर्यम्

कठिनस्य भावः
कठिनत्वम्, कठिनता, काठिन्यम्

सुन्दरस्य भावः
सुन्दरत्वम्, सुन्दरता, सौन्दर्यम्

दीनस्य भावः
दीनत्वम्, दीनता, दैन्यम्

गम्भीरस्य भावः
गम्भीरत्वम्, गम्भीरता, गाम्भीर्यम्

धीरस्य भावः
धीरत्वम्, धीरता, धैर्यम्

चतुरस्य भावः
चतुरत्वम्, चतुरता, चातुर्यम्

उदारस्य भावः
उदारत्वम्, उदारता औदार्यम्

कृपणस्य भावः
कृपणत्वम्, कृपणता, कार्पण्यम्

विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः ।
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ।। 1.1.18 ।।

पदच्छेदः – विष्णुना सदृशः वीर्ये सोमवत् प्रियदर्शनः कालाग्नि-सदृशः क्रोधे क्षमया पृथिवी-समः

पदपरिचयः –
विष्णुना सदृशः = भगवता नारायणेन तुल्यः
वीर्ये = पराक्रमे
सोमवत् = चन्द्र-सदृशं
प्रियदर्शनः = प्रिय-रूपवान्

पदपरिचयः –
कालाग्नि-सदृशः = प्रलयाग्नि-तुल्यः
क्रोधे = कोपे
क्षमया= शान्त्या
पृथिवीसमः = भूदेवी-सदृशः

# विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः ।
# कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ।। 1.1.18 ।।

सोमः इव – सोम+वति = सोमवत्

प्रियं दर्शनं यस्य सः = प्रियदर्शनः (ब.व्री)

कालस्य अग्निः = कालाग्निः (ष.तत्)

कालाग्निना सदृशः = कालाग्निसदृशः (तृ.तत्)

पृथिव्या समः = पृथिवीसमः (तृ.तत्)

प्रतिपादे उपमालङ्कारः अस्ति ।

हिमांशु,चन्द्रमस्,चन्द्र,इन्दु,कुमुदबान्धव,विधु (विध्यति विरहिणं विध्यते राहुणेति वा) ,सुधांशु,शुभ्रांशु,ओषधीश,निशापति,अब्ज,जैवातृक,सोम,ग्लौ, मृगाङ्क,कलानिधि,द्विजराज,शशधर,नक्षत्रेश,क्षपाकर,तमोनुद्,विरोचन,राजन्,हरि,तमोपह

## विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः ।
## कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ।। 1.1.18 ।।

इव-शब्द-प्रयोगकाले उपमान-उपमेययोः समाना विभक्तिः भवेत् ।

इव प्रयोगः X

छात्राः तं गुरुः इव मन्यन्ते ।
माता देवी इव तस्यै आदरेण शाटिकां दत्तवती ।
पुत्रः इव पिता तं चिन्तितवान् ।
सिंहः इव भवता धैर्येण भवितव्यम् ।
गजः इव स्थौल्यम् अस्ति एतस्य ।
शुनकः इव न व्यवहर्तव्यं त्वया ।

✓

छात्राः तं गुरुम् इव मन्यन्ते ।
माता देव्यै इव तस्यै आदरेण शाटिकां दत्तवती ।
पुत्रम् इव पिता तं चिन्तितवान् ।
सिंहेन इव भवता धैर्येण भवितव्यम् ।
गजस्य इव स्थौल्यम् अस्ति एतस्य ।
शुनकेन इव न व्यवहर्तव्यं त्वया ।

**अन्वयः**

वीर्ये विष्णुना सदृशः सोमवत् प्रियदर्शनः, क्रोधे कालाग्निसदृशः क्षमया पृथिवीसमः (रामः अस्ति)

धनदेन समस्त्यागे सत्ये धर्म इवापरः ।

(इति बालकाण्डस्य कथासारः)

पदच्छेदः – धनदेन समः त्यागे सत्ये धर्मः इव अपरः

पदपरिचयः –

धनदेन समः = कुबेरेण तुल्यः

त्यागे = दाने

सत्ये = सत्यपालने

धर्मः इव अपरः = द्वितीयः धर्मदेवः इव

धनं ददाति इति धनदः तेन धनदेन (उपपदसमासः)

उपमालङ्कारः अस्ति ।

अन्वयः

त्यागे धनदेन समः सत्ये अपरः धर्मः इव (रामः अस्ति)